# Shri Balopanishat

# શ્રીબાલોપનિષત્

## Document Information

Text title : Shri Balopanishat

File name : bAlopaniShat.itx

Category : devii, dashamahAvidyA, devI, upanishhat, upaniShat

Location : doc_devii

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Description/comments : bAlAsaparyA saparyAkrama-nAmAvalI-stotrAdisaNgrahaH

Latest update : March 21, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 22, 2020

*sanskritdocuments.org*

# શ્રીબાલોપનિષત્

(અથર્વવેદીયા)

ઐં નમઃ શ્રીબાલાયૈ । શ્રીબાલોપનિષદં વ્યાખ્યાસ્યામઃ । શ૱ૃણુ પ્રિયે
ચક્ર ચક્રસ્થા । મહાત્મા । મહાગુહ્યા । ગુહ્યતરા । શ્રેષ્ઠાતિશ્રેષ્ઠા ।
ભવ્યા । ભવ્યતરા । ત્રિગુણગા । ગુણાતીતા । ગુણસ્વરૂપા । ગુઙ્કારમધ્યસ્થા
રેચકપૂરકકુમ્ભસ્વરૂપા । અષ્ટાઙ્ગરૂપા ચતુર્દશભુવનમાલિની ।
ચતુર્દશભુવનેશ્વરી ચતુર્વેદવેદાઙ્ગપારગા । સાઙ્ખ્યાસાઙ્ખ્યસ્વરૂપા ।
શાન્તા । શાક્તપ્રિયા । શાક્તધર્મપરાયણા । સર્વભદ્રા વિભદ્રા । સુભદ્રા ।
ભદ્રભદ્રાન્તર્ગતા । વીરભદ્રાવતારિણી । શૂન્યા શૂન્યતરા શૂન્યપ્રભવા
શૂન્યાલયા શૂન્યજ્ઞાનપ્રદા શૂન્યાતીતા શૂલહસ્તા મહાસુન્દરી
સુરાસુરારિવિધ્વંસિની શૂકરાનના સુભગા શુભદા સુશુભા શસ્ત્રાસ્ત્રધારિણી
પરાપ્રાસાદવામાઙ્ગા પરમેશ્વરી પરાપરા પરમાત્મા પાપઘ્ના પઞ્ચેન્દ્રિયાલયા
પરબ્રહ્માવતારા પદ્મહસ્તા પાઞ્ચજન્યા પુણ્ડરીકાક્ષા પશુપાશહારિણી
પશુપપૂજ્યા પાખણ્ડધ્વંસિની પવનેશી પવનસ્વરૂપા પદ્યાપદ્યમયી
પદ્યજ્ઞાનપ્રદાત્રી પુસ્તહસ્તા પક્વબિમ્બફલપ્રભા પ્રેતાસના પ્રજાપાલી
પ્રપઞ્ચહારિણી પૃથિવીરૂપા પીતામ્બરા પિશાચગણસેવિતા પિતૃવનસ્થા
હંસસ્વરૂપા પરમહંસી ઐઙ્કારબીજા વાગ્ભાવસ્થા વાગ્ભવબીજોદ્યોગિની
વાગ્ભાવેશી વાગ્ભવબીજમાલિની યઃ એવં વેદ સ વેદવિત્ । બાલોપનિષદં
યઃ પઠતિ યઃ શ૱ૃણોતિ તસ્યાદ્યં સર્વં નશ્યતિ ચતુર્વર્ગફલં પ્રાપ્નોતિ
લયજ્ઞાનં ભવતિ જ્યોતિર્મયે પ્રલીયતે ષટ્કર્મવિદ્યા સિદ્ધ્યતિ મનોરથં
પૂરયતિ સર્વારિષ્ટં નાશયતિ ધનં એધતિ આયુર્વૃદ્ધિર્ભવતિ નિર્વાણપદં
ગચ્છતિ મહાજનત્વં પ્રાપ્નોતિ સર્વશાસ્ત્રં જ્ઞાપયતિ બહુતરસિદ્ધિં
નયતિ ડાકિન્યાદિ સર્વં પલાયતિ ઓઙ્કારે પ્રમીલતિ ।

ઇતિ અથર્વવેદીયા શ્રીબાલોપનિષત્ સમાપ્તા ।

Proofread by PSA Easwaran

*Shri Balopanishat*

pdf was typeset on March 22, 2020

Please send corrections to *sanskrit@cheerful.com*